# श्री कनकधारा स्तोत्रम् śrī kanakadhārā stotram

## कनकलक्ष्मी स्तवः kanakalakṣmī stavaḥ

## श्री शङ्कराचार्य कृतम् śrī śaṅkarācārya kṛtam



अङ्गं हरेः पुलक भूषणमाश्रयन्ती । भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।

अङ्गीकृताखिल विभूतिरपाङ्गलीला । माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥ १ ॥

aṅgaṁ hareḥ pulaka bhūṣaṇamāśrayantī |
bhṛṅgāṅganeva mukulābharaṇaṁ tamālam |
aṅgīkṛtākhila vibhūtirapāṅgalīlā |
māṅgalyadā'stu mama maṅgaladevatāyāḥ || 1||

मुग्धा मुहुर्विदधती वदने मुरारेः ।      प्रेमत्रपाप्रणिहितानि गतागतानि ।

मालादृशोर्मधुकरीव महोत्पले या ।      सा मे श्रियं दिशतु सागरसम्भवायाः ॥ २ ॥

mugdhā muhurvidadhatī vadane murāreḥ ǀ
premmatrapāpraṇihitāni gatāgatāni ǀ
mālādṛśormadhukarīva mahotpale yā ǀ
sā me śriyaṁ diśatu sāgarasambhavāyāḥ ǀǀ 2ǀǀ

विश्वामरेन्द्र पदविभ्रमदानदक्षं-आनन्द हेतुरधिकं मधुविद्विषोऽपि ।

ईषन्निषीदतु मयि क्षण मीक्षणार्द्धम् ।      इन्दीवरोदर सहोदर मिन्दिरायाः ॥ ३ ॥

viśvāmarendra padavibhramadānadakṣaṁ-
ānanda heturadhikaṁ madhuvidviṣo'pi ǀ
īṣanniṣīdatu mayi kṣaṇa mīkṣaṇārddham ǀ
indīvarodara sahodara mindirāyāḥ ǀǀ 3ǀǀ

आमीलिताक्षमधिगम्य मुदा मुकुन्दं-आनन्दकन्दमनिमेष-मनङ्गतन्त्रम् ।

आकेकरस्थितकनीनिकपक्ष्मनेत्रं-भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ ४ ॥

āmīlitākṣamadhigamya mudā mukundaṁ-
ānandakandamanimeṣa-manaṅgatantram ǀ
ākekarasthitakanīnikapakṣmanetraṁ-
bhūtyai bhavenmama bhujaṅgaśayāṅganāyāḥ ǀǀ 4ǀǀ

बाह्वन्तरे मुरजितः श्रितकौस्तुभे या ।      हारावलीव हरिनीलमयी विभाति ।

कामप्रदा भगवतोऽपि कटाक्षमाला ।      कल्याणमावहतु मे कमलालयायाः ॥ ५ ॥

bāhvantare murajitaḥ śritakaustubhe yā ǀ
hārāvalīva harinīlamayī vibhāti ǀ
kāmapradā bhagavato'pi kaṭākṣamālā ǀ
kalyāṇamāvahatu me kamalālayāyāḥ ǀǀ 5ǀǀ

कालाम्बुदाळि ललितोरसि कैटभारेः।     धाराधरे स्फुरति या तडिदङ्गनेव।

मातुस्समस्तजगतां महनीय मूर्तिः।     भद्राणि मे दिशतु भार्गवनन्दनायाः॥ ६॥

kālāmbudāḻi lalitorasi kaiṭabhāreḥ ।
dhārādhare sphurati yā taḍidaṅganeva ।
mātussamastajagatāṁ mahanīya mūrtiḥ ।
bhadrāṇi me diśatu bhārgavanandanāyāḥ ।। 6।।

प्राप्तं पदं प्रथमतः खलु यत्प्रभावान्-माङ्गल्यभाजि मधुमाथिनि मन्मथेन।

मय्यापतेत्तदिह मन्थरमीक्षणार्धं।     मन्दालसं च मकराकरकन्यकायाः॥ ७॥

prāptaṁ padaṁ prathamataḥ khalu yatprabhāvān-
māṅgalyabhāji madhumāthini manmathena ।
mayyāpatettadiha mantharamīkṣaṇārdhaṁ ।
mandālasaṁ ca makarākarakanyakāyāḥ ।। 7।।

दद्याद्दयानुपवनो द्रविणाम्बुधारां-अस्मिन्नकिञ्चन विहङ्गशिशौ विषण्णे।

दुष्कर्मघर्ममपनीय चिराय दूरं।     नारायणप्रणयिनी नयनाम्बुवाहः॥ ८॥

dadyāddayānupavano draviṇāmbudhārāṁ-
asminnakiñcana vihaṅgaśiśau viṣaṇṇe ।
duṣkarmagharmamapanīya cirāya dūraṁ ।
nārāyaṇapraṇayinī nayanāmbuvāhaḥ ।। 8।।

इष्टा विशिष्टमतयोऽपि नरा यया द्राक्।     दृष्टा स्त्रिविष्टपपदं सुलभं भजन्ते।

दृष्टिः प्रहृष्टकमलोदर दीप्तिरिष्टां।     पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः॥ ९॥

iṣṭā viśiṣṭamatayo'pi narā yayā drāk ।
dṛṣṭā striviṣṭapapadaṁ sulabhaṁ bhajante ।
dṛṣṭiḥ prahṛṣṭakamalodara dīptiriṣṭāṁ ।
puṣṭiṁ kṛṣīṣṭa mama puṣkara viṣṭarāyāḥ ।। 9।।

गीर्देवतेति गरुडध्वजसुन्दरीति । शाकम्भरीति शशिशेखर-वल्लभेति ।
सृष्टिस्थितिप्रलय केळिषु संस्थितायै । तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै ॥ १० ॥

gīrdevateti garuḍadhvajasundarīti |
śākambharīti śaśiśekhara-vallabheti |
sṛṣṭisthitipralaya keḻiṣu saṁsthitāyai |
tasyai namastribhuvanaika gurostaruṇyai || 10||

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै । रत्यै नमोऽस्तु रमणीय गुणार्णवायै ।
शक् त्यै नमोऽस्तु शतपत्रनिकेतनायै । पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै ॥ ११ ॥

śrutyai namo'stu śubhakarmaphalaprasūtyai |
ratyai namo'stu ramaṇīya guṇārṇavāyai |
śak tyai namo'stu śatapatraniketanāyai |
puṣṭyai namo'stu puruṣottama vallabhāyai || 11||

नमोऽस्तु नाळीक निभाननायै । नमोऽस्तु दुग्धोदधि जन्मभूम्यै ।
नमोऽस्तु सोमामृत सोदरायै । नमोऽस्तु नारायण वल्लभायै ॥ १२ ॥

namo'stu nāḻīka nibhānanāyai |
namo'stu dugdhodadhi janmabhūmyai |
namo'stu somāmṛta sodarāyai |
namo'stu nārāyaṇa vallabhāyai || 12||

नमोऽस्तु हेमाम्बुजपीठिकायै । नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै । नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥

namo'stu hemāmbujapīṭhikāyai |
namo'stu bhūmaṇḍalanāyikāyai |
namo'stu devādidayāparāyai |
namo'stu śārṅgāyudhavallabhāyai || 13||

नमोऽस्तु  देव्यै भृगुनन्दनायै ।      नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै ।      नमोऽस्तु दामोदर वल्लभायै ॥ १४ ॥

namo'stu  devyai bhṛgunandanāyai |
namo'stu viṣṇorurasi sthitāyai |
namo'stu lakṣmyai kamalālayāyai |
namo'stu dāmodara vallabhāyai || 14||

नमोऽस्तु कान्त्यै कमलेक्षणायै ।      नमोऽस्तु भूत्यै भुवन प्रसूत्यै ।
नमोऽस्तु देवादिभिरर्चितायै ।      नमोऽस्तु नन्दात्मज वल्लभायै ॥ १५ ॥

namo'stu kāntyai kamalekṣaṇāyai |
namo'stu bhūtyai bhuvana prasūtyai |
namo'stu devādibhirarcitāyai |
namo'stu nandātmaja vallabhāyai || 15||

सम्पत्कराणि सकलेन्द्रियनन्दनानि ।      साम्राज्यदान निरतानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि ।      मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

sampatkarāṇi sakalendriyanandanāni |
sāmrājyadāna niratāni saroruhākṣi |
tvadvandanāni duritāharaṇodyatāni |
māmeva mātaraniśaṁ kalayantu mānye || 16||

यत्कटाक्ष समुपासनाविधिः ।      सेवकस्य सकलार्थसंपदः ।
संतनोति वचनाङ्गमानसैः ।      त्वां मुरारिहृदयेश्वरीं भजे ॥ १७ ॥

yatkaṭākṣa samupāsanāvidhiḥ |
sevakasya sakalārthasampadaḥ |
santanoti vacanāṅgamānasaiḥ |
tvāṁ murārihṛdayeśvarīṁ bhaje || 17||

सरसिजनिलये सरोजहस्ते । धवलतमांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे । त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८ ॥

sarasijanilaye sarojahaste |
dhavalatamāṁśukagandhamālyaśobhe |
bhagavati harivallabhe manojñe |
tribhuvanabhūtikari prasīda mahyam || 18||

दिग्गस्तिभिः कनककुम्भमुखावसृष्ट । स्वर्वाहिनी विमलचारुजलप्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष-लोकादिनाथ गृहिणीममृताब्धि पुत्रीम् ॥ १९ ॥

diggastibhiḥ kanakakumbhamukhāvasṛṣṭa |
svarvāhinī vimalacārujalaplutāṅgīm |
prātarnamāmi jagatāṁ jananīmaśeṣa-
lokādinātha gṛhiṇīmamṛtābdhi putrīm || 19||

कमले कमलाक्षवल्लभे त्वं । करुणापूर-तरङ्गितै-रपाङ्गैः ।
अवलोकय मामकिञ्चनानां । प्रथमं पात्रमकृत्रिमन्दयायाः ॥ २० ॥

kamale kamalākṣavallabhe tvaṁ |
karuṇāpūra-taraṅgitai-rapāṅgaiḥ |
avalokaya māmakiñcanānāṁ |
prathamaṁ pātramakṛtrimandayāyāḥ || 20||

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं । त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतर भाग्य भाजिनो । भवन्ति ते भुवि बुधभाविताशयाः ॥ २१ ॥

stuvanti ye stutibhiramūbhiranvahaṁ |
trayīmayīṁ tribhuvanamātaraṁ ramām |
guṇādhikā gurutara bhāgya bhājino |
bhavanti te bhuvi budhabhāvitāśayāḥ || 21||

॥ इति श्रीमद् शङ्कराचार्यकृत श्री कनकधारास्तोत्रं संपूर्णम् ॥

|| iti śrīmad śaṅkarācāryakṛta śrī kanakadhārāstotraṁ sampūrṇam ||